सदा। अतिप्रवर्त्तमानञ्च स्थापयेदतिसारवत्। यदा कोष्ठानुगाः पक्का विबद्धाः स्रोतसां मलाः। अचिरज्वरितस्यापि तदा दद्याद्विरेचनम्। पक्वोह्यनिर्हृतोदोषो देहे तिष्ठन् महात्ययम्। विषमं वा ज्वरं कुर्य्याद्बलव्यापदमेव च। तस्मान्निर्हरणं कार्य्यं दोषाणां वमनादिभिः। प्राक्कर्म्म वमनं चास्य कार्य्यमास्थापनं तथा। विरेचनं तथा कुर्य्याच्छिरसश्च विरेचनम्। क्रमेण बलिने देयं वमनं श्लैष्मिके ज्वरे। पित्तप्राये विरेकस्तु कार्य्यः प्रशिथिलाशये। सरुजेऽनिलजे कार्य्यं सोदावर्त्ते निरूहणम्। कटीपृष्ठग्रहार्त्तस्य दीप्ताग्नेरनुवासनम्। शिरोगौरवशूलघ्नमिन्द्रियप्रतिबोधनम्। कफाभिपन्ने शिरसि कार्य्यं मूर्द्धविरेचनम्। दुर्बलस्य समाध्मातमुदरं सरुजं दिहेत्। दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः। अम्लपिष्टैः सुखोष्णैश्च पवने त्वूर्द्ध्वमागते। रुद्धमूत्रपुरीषाय गुदे वर्त्तिं निधापयेत्। पिप्पलीपिप्पलीमूलयवानीचव्यसाधिताम्। पाययेत यवागूं वा मारुतायानुलोमनीम्। शुद्धस्योभयतो यस्य ज्वरः शान्तिं न गच्छति। सशेषदोषरूक्षस्य तस्य तं सर्पिषा जयेत्। लङ्घनैर्वाल्पदोषञ्च शमनीयैरुपाचरेत्। उपवासैर्बलस्यन्तु ज्वरे सन्तर्पणोत्थिते। क्लिन्नां यवागूं मन्दाग्निं तृषार्त्तं पाययेन्नरम्। तृट्छर्द्दिदाहघर्मार्त्तं मद्यपं लाजतर्पणम्। सक्षौद्रमम्भसा पश्चाज्जीर्णे यूषरसौदनम्। उपवासश्रमकृते क्षीणे वाताधिके ज्वरे। दीप्ताग्निं भोजयेत्प्राज्ञो नरं मांसरसौदनम्। मुद्गयूषौदनश्चापि हितं कफसमुत्थिते। स एव सितया युक्तः शीतः पित्तज्वरे हितः। दाडिमामलमुद्गानां यूषश्चानिलपैत्तिके। ह्रस्वमूलकयूषेण भोजयेत्कफवातिके। पटोलनिम्बयूषस्तु पथ्यः पित्तकफात्मके। दाहच्छर्द्दियुतं क्षामं निरन्नं तृष्णयार्द्दितम्। सिताक्षौद्रयुतं लाजतर्पणं पाययेत च। कफपित्तपरीतस्य ग्रीष्मेऽक्षकपित्तिनस्तथा। मद्यनित्यस्य न हिता यवागूस्तमुपाचरेत्। यूषैरम्लैरनम्लैर्वा जाङ्गलैर्वा रसैर्हितैः। मद्यं पुराणं मन्दाग्नेर्य्यवान्नोपहितं हितम्। सव्योषं वितरेत्तक्रं कफारोचकपीड़िते। क्षीणोऽल्पदोषो दीनश्च नरो जीर्णज्वरार्द्दितः। विबद्धः सृष्टदोषश्च रूक्षः पित्तानिलज्वरी। पिपासार्त्तः सदाहो वा पयसा स सुखी भवेत्। तदेव तु पयः पीतं तरुणे हन्ति मानवम्। सर्वज्वरेषु सप्ताहं मात्रावद्भोजनं हितम्। वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम्। ज्वरितो हितमश्नीयाद्यद्यप्यस्यारुचिर्भवेत्। अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथ वा। गुर्व्वभिष्यन्द्यकाले च ज्वरी नाद्यात्कथञ्चन। न तु तस्याहितं भुक्तमायुषे वा सुखाय वा। सततं विषमं वापि क्षीणस्य सुचिरोत्थितम्। ज्वरं संभोजनैः पथ्यैर्लघुभिः समुपाचरेत्। मुद्गान्मसूरांश्चणकान् कुलत्थान् समकुष्ठकान्। आहारकाले यूषार्थं ज्वरिताय प्रदापयेत्। लावान् कपिञ्जलानेणान् पृषतान् शरभान् शशान्। कालपुच्छान् कुरङ्गांश्च तथैव मृगमातृकाम्। मांसार्थे मांससात्म्यानां ज्वरितानां प्रदापयेत्। सारसक्रौञ्चशिखिनः कुक्कुटांस्तित्तिरींस्तथा। गुरूष्णत्वान्न शंसन्ति ज्वरे केचिच्चिकित्सकाः। ज्वरितानां प्रकोपन्तु यदा याति समीरणः। तदैतेऽपि हि शस्यन्ते मात्राकालोपपादिताः। परिषेकावगाहांश्च स्नेहान् संशोधनानि च। स्नानाभ्यङ्गदिवास्वप्नशीतव्यायामयोषितः। न भजेत ज्वरोत्सृष्टो यावन्न बलवान् भवेत्। त्यक्तस्यापि ज्वरेणाशु दुर्बलस्याहितैर्ज्वरः। प्रत्यापन्नो दहेद्देहं शुष्कं वृक्षमिवानलः। तस्मात्कार्य्यः परीहारो ज्वरमुक्तेन जन्तुना। यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा। ज्वरे प्रमोहो भवति स्वल्पैरप्यवचेष्टितैः। निषण्णं भोजयेत् तस्मान्मूत्रोच्चारौ च कारयेत्। अरोचके गात्रसादे वैवर्ण्येऽङ्गमलादिषु। शान्तज्वरोऽपि शोध्यः स्यादनुबन्धभयान्नरः। न जातु तर्पयेत् प्राज्ञः सहसा ज्वरकर्शितम्। तेन सन्दूषितो ह्यस्य पुनरेव भवेज्ज्वरः। चिकित्सेच्च ज्वरान् सर्व्वान्निमित्तानां विपर्य्ययैः। श्रमक्षयाभिघातोत्थे मूलव्याधिमुपाचरेत्। स्त्रीणामपप्रजातानां स्तन्यावतरणे च यः। तत्र संशमनं कुर्य्याद्यथादोषं विधानवित्”।

अत्र विशेषो गरुड़ पुरा० १५२ अ० उक्तो यथा। “ज्वरोरोगपतिः पाप्मा मृत्युराजोऽशनोऽन्तकः। क्रोधाद्दक्षाध्वरध्वंसी रुद्रोर्द्ध्वनयनोद्भवः। तत्सन्तापो मोहमयः सन्तापात्माऽपचारजः। विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते। पाकलो गजेष्वभितापो वाजिष्वलर्कः कुक्कुरेषु। इन्द्रमदो जलदेऽप्सु नीलिका ज्योतिरौषधिषु भूम्यामूषरो नाम। ह्न्मानुष्येच्छर्दनं कासः स्तम्भः शैत्यं खगादिषु। अङ्गेषु शीतपिड़कामात्रो दर्दः कफोद्भवे। काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा। निदानोक्तानुपशयो विपरीतोपशायिता। अरुचिश्चाविपाकश्च स्तम्भमालस्यमेव च। हृद्दाहश्च विपा-